संस्कृतवार्ताः

20.04.2024

सायम् - 06:20

<u>मुख्यवार्ता:</u>

· लोकसभानिर्वाचनस्य द्वितीय-चरणार्थं प्रचाराभियानं जवीयगत्या प्रवर्तते। यस्मिन् अष्टाशीति-संसदीय-क्षेत्रेभ्य: अस्य मासस्य षड्विंशे दिनाङ्के मतदानानि भविष्यन्ति।

· लोकसभा-निर्वाचनस्य तृतीयचरणाय नामाङ्कपत्राणाम् अनुसन्धेयकार्यम् अद्य सम्पन्नम् ।

· भारतस्य मुख्यन्यायाधीश: डी.वाई. चन्द्रचूड: प्रोक्तवान् यत् साम्प्रतिके काले अधिनियमान्तर्गतानां नवीन-आपराधिक-विधिनां क्रियान्वयनं स्पष्टरूपेण प्रदर्शयति यत् देश: परिवर्तनशील: समुदीयमानश्च च भवति।

· भारतर्तु-विज्ञान-विभागेन सोमवासरं यावत् ओडिशा-गांगीय-पश्चिमबंगालयो: उष्णलहरी प्रकल्पिता तत्रैव उत्तरभारतस्य केभ्यश्चित् भागेभ्य: वृष्टि: हिमपातश्च अनुमानित:।

· किर्गिस्ताने एशियाई-ओलंपिक-क्वालीफायर-प्रतिस्पर्धायां भारतीय-मल्लयुद्धक्रीडिका: विनेश-फोगाट:, अंशू मलिक:, मानसी-रीतिका इत्येता: उपान्त्यचक्रे सम्प्रविष्टवत्य।

· आई.पी.एल. क्रिकेटक्रीडामालिकायां **अद्यतने द्वन्द्वे**, सायं **दिल्ली-कैपिटल्स-दलं सनराईजर्स-हैदराबाद-दलेन** सह **स्पर्धिष्यते**।

<u>प्रचार:अवशिष्ट-चरणा:</u>

सामान्य-निर्वाचनानां प्रथमचरणस्य समाप्ते: अनन्तरं लोकसभानिर्वाचनस्य द्वितीय-चरणार्थं प्रचाराभियानं जवीयगत्या प्रवर्तते। द्वितीय-चरणे अस्य मासस्य षड्विंशे दिनाङ्के द्वादश-राज्यानां केन्द्रशासितप्रदेशानाञ्च अष्टाशीति: संसदीयासनेषु सममेव मणिपुर-लोकसभाक्षेत्रस्य अवशिष्टभागेषु मतदानानि भविष्यन्ति। अवसरेऽस्मिन् केरलस्य विंशति: आसनानि, कर्णाटकस्य चतुर्दशासनानि, राजस्थानस्य त्रयोदशासनानि, उत्तरप्रदेशस्य अष्टौ, महाराष्ट्रस्य अष्टौ, मध्यप्रदेशस्य सप्तासनानि, असमस्य पञ्चासनानि, बिहारस्यापि पञ्चासनानि, पश्चिमबंगालस्य त्रीणि आसनानि, छत्तीसगढ़स्यापि त्रीणि आसनानि, त्रिपुरा-जम्मूकश्मीरयो: एकं-एकं आसनं समेत्य द्वितीयचरणे मतदानानि भविष्यन्ति। विभिन्न-राजनैतिक-दलानां वष्ठिनेतार: मतदातृन् आक्रष्टुं अशेषे हि देशे जनसभा: सम्बोधने दत्तचिता: सन्ति। प्रधानमन्त्री एवं भाजपेति दलस्य वरिष्ठ-नेता नरेन्द्रमोदी महाराष्ट्रस्य नांदेड़-परभणी-स्थलयो: जनसभां सम्बोधितवान्। श्रीमोदिना ह्य: लोकसभा-निर्वाचनस्य प्रथमचरणे महत्संख्यायां मतदानार्थं प्रसन्नता प्रकटिता। तेनोदीरितं यत् देशे जायमानस्य लोकतन्त्रोत्सवस्य काले इतोऽपि मतदानानां सुनिश्चयो भवेत्। अत्रावसरे तेन एनडीए-सर्वकारस्य-उपलब्धय: अपि प्रकाशिता:। एतस्मिन्नन्तर्गतं लक्षाधिकाभ्य: महिलाभ्य: शौचालयप्रदानम् निर्धनेभ्य: वित्तकोषस्य सौविध्यप्रदानम्, यूपीआई-प्रविधे: समारम्भ:, इत्येता: सुविधा:सन्ति। प्रधानमन्त्री नरेन्द्र मोदी चिक्काबल्लापुर-बेगलुरु स्थलयो: अपि सार्वजनिक-उपवेशनं विधास्यति। कर्णाटकस्य मुख्यमन्त्री एवं कांग्रेस-नेता सिद्धारमैया मैसूरे एवं मांड्या-निर्वाचनक्षेत्रेषु निर्वाचनप्रचारं कुर्वन्नस्ति। अपरत्र कर्णाटकस्य

उपमुख्यमन्त्री डी.के. शिवकुमार: अद्य मांड्यायां निर्वाचनप्रचारं कुर्वन् वर्तते। कांग्रेस-नेत्रा राहुल-गान्धिना बिहारस्य भागलपुरे नैर्वाचनिक-जनसभा सम्बोधिता।

## निरीक्षणं-तृतीयचरणं

लोकसभा-निर्वाचनस्य तृतीयचरणाय नामाङ्कपत्राणां निरीक्षणम् अद्य प्रचलति। ह्य: नामाङ्कनप्रपूरणप्रक्रिया समाप्ता जाता। एतस्मिन् तृतीयचरणे दशराज्येषु द्वयो:केन्द्र-शासितप्रदेशयोश्च चतुर्नवति-संसदीय-क्षेत्रेभ्य: मईमासस्य सप्तमे दिनांके मतदानं भविष्यति। प्रत्याशिन: सोमवासरं यावत् स्वीयनामांकन- प्रत्यावर्तनं कर्तुं शक्नुवन्ति। गुजरातराज्ये लोकसभानिर्वाचनस्य विधानसभानिर्वचनस्य च उपनिर्वाचनस्य नामांकन पत्रनिरीक्षणं प्रचलति। ध्येयं वर्तते यत् लोकसभानिर्वाचनस्य चतुर्थचरणाय नामाङ्कपत्रपूरणस्य कार्यं गुरुवासरे भविता। एतिस्मिन् चतुर्थे चरणे मईमासस्य त्रयोदशदिनांके नवराज्यानां एकस्य केन्द्रशासितप्रदेशस्य षण्णवति-लोकसभा-क्षेत्रेभ्य: मतदानानि भविष्यन्ति। अस्य मासस्य पञ्चविंशे दिने नामांकनप्रत्यावर्तनं कर्तुं शक्यते।

## निर्वाचनायोग:प्रथमचरणम्

सामान्य-निर्वाचनस्य प्रथमचरणे द्विषष्टि: दशमलव-त्रीणि-सप्त-प्रतिशतादधिकानि मतदानानि समभवन्। मतदानं शान्तिपूर्णरीत्या संपन्नम्। मतदातृभि: नागरिक-दायित्वस्य गौरवस्य च समीचीनं प्रदर्शनं कृतम्। अत्युष्णलहर्या: प्रकोपेऽपि जनै: उत्साहेन मतदानं विहितम्। प्रथमचरणे सप्तदशराज्यानां चतुर्णां केन्द्रशासितप्रदेशानां च द्वयधिकैकशतासनेषु मतदानानि समभवन्। निर्वाचनायोगेन अवसरेऽस्मिन् सर्वेभ्य: मतदातृभ्य: कार्यकर्तृभ्यश्च धन्यवादो ज्ञापित:

## मुख्यन्यायाधीश:

भारतस्य मुख्यन्यायाधीश: डॉ. डी.वाई. चन्द्रचूड: प्रोक्तवान् यत् साम्प्रतिके काले अधिनियमान्तर्गतानां नवीन-आपराधिक-विधिनां क्रियान्वयनं स्पष्टरुपेण प्रदर्शयति यत् देश: परिवर्तनशील: समुदीयमानश्च भवति। अद्य नवदिल्ल्यां एकां संगोष्ठीं सम्बोधयन् असौ उक्तवान् यत् भारतीय-न्याय-संहिता भारतीय-नागरिक-सुरक्षा-संहिता भारतीय-साक्ष्य-अधिनियमश्च इत्येतेषां माध्यमेन राष्ट्रं स्वीय-आपराधिक-न्याय-प्रणाल्यां महत्वपूर्णपरिवर्तनाय तत्परं वर्तते। असौ कथितवान् यत् एते विधय: आपराधिक-न्याये भारतस्य विधिक-संरचना:नव-युगे परिवर्तिता:। कृत्रिममेधा: उपयोगेऽपि सबलं प्रत्यपादयत् यत् ए.आई. इति न्यायपालिकां आपराधिक घटनासु प्रगति-मापनं सक्षमं करिष्यति। असौ उक्वान् यत् एते विधय: राष्ट्रस्य प्रत्येक-नागरिकै: आत्मसात्क्रियन्ते।

## भारर्ततु-विभाग

भारतर्तु-विज्ञान-विभागेन सोमवासरं यावत् ओडिशा-गांगीय-पश्चिमबंगालयो: उष्णलहरी प्रकल्पिता तत्रैव उत्तरभारतस्य केभ्यश्चित् भागेभ्य: वृष्टि: हिमपातश्च अनुमानित:। आगामिनं दिनद्वयं यावत् झारखण्डस्य केषुचित् भागेषु अत्यधिकग्रीष्मता अनुमानिता। ऋतु-विभागेन सम्भावितं यत् तेलंगाना-तटीयआन्ध्रप्रदेश-यनम-रायलसीमा-केरल-माहे-उपहिमालयीय-पश्चिम-बंगाल-सिक्किम-राज्येषु उष्णता आर्द्रता च भविष्यति। अनेन विभागे अग्रे प्रख्यापितं यत् जम्मूकश्मीर-लद्दाख-गिलगित-बाल्टिस्तान-मुजफ्फराबाद-हिमाचलप्रदेश-पञ्जाब-हरियाण-राजस्थान-राज्येषु अग्रमेषु दिवसेषु विद्युद्ध्वनिना वायुना सह मध्यमवृष्टि: हिमपातश्च भविष्यति। तत्रैव राष्ट्रिय-राजधान्यां जना: अग्रिमेषु केषुचित् दिवसेषु तीव्रवायुप्रवाहं वृष्टिकणानि च अवलोकयिष्यन्ति।

## सीतारामण्

भाजपादलस्य वरिष्ठनेत्री वित्तमन्त्री च निर्मला-सीतारामन् इत्येषा सप्तचत्वारिंशदधिक-द्विसहस्रतमवर्षं यावत् भाजपेतिप्रशासनेन साधितं विकसितभारतस्य स्वप्नं पुनरावर्तितवती। अहमदाबादनगरे गुजरात-चैम्बर-ऑफ-कॉमर्स-एण्ड-इण्डस्ट्रीज-इत्यनेन समायोजिते विकसितभारतं @सप्तचत्वारिंशदाधिक-द्विसहस्रं इत्यस्मिन् पारस्परिकसत्रे प्रवदन्ती सुश्री सीतारामन् इत्येषा भारतस्य आर्थिक- परिवर्तने यथा मुद्रास्फीते: द्वयंकने प्रकाशम् आनीतवती। अनया निवेशम् आक्रष्टुं गुजरातस्य महत्वपूर्ण-भूमिकाया: विषय: कथित:।

## मल्लयुद्ध

कीर्गिस्ताने एशियाई-ओलंपिक-क्वालीफायर-प्रतिस्पर्धायां भारतीय-मल्लयुद्धक्रीडिका: विनेश-फोगाट:, अंशू मलिक:, मानसी-रीतिका इत्येता: उपान्त्यचक्रे सम्प्रविष्टवत्य:। विनेश फोगाट: इत्यनया महिलानां पञ्चाशत् किलोग्राम-भारवर्गे कंबोडियाई-प्रतिद्वन्द्वी समानांग डीट इत्येषा पराजिता, महिलानां सप्तपञ्चाशत्-किलोग्रामभारवर्गे अंशू मलिक: इत्यनया किर्गिस्तानस्य कलमीरा बिलिमबेकोवा द्वादश-एकं इत्यङ्कान्तरालेन पराजिता। द्विषष्टि: मितात्मके-भारवर्गे मानसी कजाकिस्तानस्य इरिन कुजसेत्सोवां पराजित्य विजितवती। सहैव रीतिका इत्यनया षड्सप्तति, किलोग्राममितात्मके वर्गे चीनस्य जुआनवांग पराजिता।

## आई.पी.एल्.-क्रिकेट्

आई.पी.एल. क्रिकेटक्रीडामालिकायां अद्यतने द्वन्द्वे, अरूणजेटलीति- क्रिकेट- क्रीडांगणे दिल्ली-कैपिटल्स-दलं सनराईजर्स-हैदराबाद-दलेन सह स्पर्धिष्यते। इयं स्पर्धा सायं सार्ध-सप्तवादने आरप्स्यते। ह्य: लखनऊ-सुपर-जायंट्स-दलेन चेन्नई-सुपर-किंग्स -दलम् लखनऊ-नगरे एकाना-क्रिकेट-क्रीडांगणे अष्ट-स्तोभै: पराजितम्।

।। इति वार्ता: ।।